# Navaratnamala

# નવરત્નમાલા

## Document Information

Text title : Navaratnamala

File name : navaratnamAlA.itx

Category : deities_misc, gurudev, chandrashekharabhAratI, nava

Location : doc_deities_misc

Author : chandrashekharabhAratI

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Sri Gururaja Sukti Malika

Latest update : January 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# નવરત્નમાલા

લોકં સમસ્તમપિ મોહમહાન્ધકાર-
    નશ્યત્ દૃશં ભવમહાજલધૌ પતન્તમ્ ।
સ્વોક્ત્યઞ્જનેન સમપાલયદાશુ યઃ સઃ
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૧॥

પાષણ્ડમુખ્યમતકુમ્ભિષુ કેસરીન્દ્રઃ
    પાપાટવીદવવિભાવસુરાનતાનામ્ ।
અદ્વૈતવારિનિધિપૂર્ણશશી ચ યઃ સઃ
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૨॥

શબ્દાદિમાન્ હિ વિષયાન્વિષતુલ્યકક્ષ્યાન્
    જ્ઞાત્વાપિ તત્ર બહુરાગવતો મમાશુ ।
પાદાનતાખિલજનસ્ય વિરક્તિદાતા
    દૃગ્ગોચરો ભવતુ દેશિકસાર્વભૌમઃ ॥ ૩॥

શ્રીમન્નૃસિંહગુરુપાદયુગાબ્જભૃઙ્ગઃ
    સીમાવિલઙ્ઘિધિષણોઽખિલશાસ્ત્રવેત્તા ।
નમ્રાન્તરાન્ધ્યવિનિવારણચણ્ડરશ્મિઃ
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૪॥

કામાદિશૃઙ્ગિપરિભેદનવજ્રપાણિઃ
    નામાવધૂતનિખિલાઘચયો મહસ્વી ।
સામાદિશીર્ષપરિગીતનિજસ્વરૂપઃ
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૫॥

આશ્રામવાસિવટુમેકમભાષમાણં
    સમ્ભાષમાણમકરોત્ત્વરિતં કૃપાતઃ ।
શ્રીશઙ્કરાર્ય ઇવ યઃ સ હિ હસ્તધાત્રીં
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૬॥

વિપ્રં હ્યપસ્મૃતિયુતં પ્રસમીક્ષ્ય તસ્ય
    મૂર્ધ્ન્યઙ્ઘ્રિમાદધદપારકૃપામ્બુરાશિઃ ।
યો દક્ષિણાસ્ય ઇવ રોગમપાનુદત્તં
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૭॥

ઊર્ધ્વસ્થલાન્નિપતિતાં ગૃહગોધિકાં યઃ
    ત્યક્તાસુમાશુ કરકામ્બુકણેન સિક્ત્વા ।
સોઽજીવયજ્જનસમક્ષમમેયશક્તિઃ
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૮॥

મર્ત્યાચિકિત્સ્યબહુકુષ્ઠનિપીડિતં યઃ
    વિપ્રં હિ કઞ્ચન તદામયહીનમાશુ ।
ચક્રે સ દત્ત ઇવ કેવલભસ્મદાનાત્
    દૃગ્ગોચરો ભવતુ દેશિકરાણ્મમાશુ ॥ ૯॥

ઇતિ શ્રીજગદ્ગુરુ શ્રીશૃઙ્ગેરીપીઠાધિપ શ્રીચન્દ્રશેખરભારતી
    શ્રીપાદૈઃ વિરચિતા નવરત્નમાલા સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Navaratnamala*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*